# Swami Vivekananda Stotram

# विवेकानन्दस्तोत्रम्

## Document Information

Text title : Vivekanandastotram 1

File name : vivekAnandastotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Swami Gunatitananda

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : March 5, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# विवेकानन्दस्तोत्रम्

यतिसङ्घप्रतिष्ठाता तच्छिरोमणिसत्तमः ।
रामकृष्णमहाशिष्यो नेता भुवि नरोत्तमः ।
त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ १॥

दिगन्तव्याप्तसत्कीर्ती राष्ट्रोद्धारकमण्डनः ।
महाराजगुरुर्दण्डी भारतोत्कर्षसाधनः ।
त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ २॥

ज्ञाननेत्रस्फुरत्कायो नाट्यगानसुपारगः ।
व्याख्यानपटुपूर्णज्ञः सन्न्यासी श्रेष्ठचिद्घनः ।
त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ ३॥

तारुण्योज्ज्वलरम्याङ्गो वेदसिद्धान्तदर्शनः ।
विश्वव्यापकहृत्प्रेमा विशालज्ञानलोचनः ।
त्वत्तो न हि परः कोऽपि विवेकानन्द ते नमः ॥ ४॥

भवरोगमहावैद्यो वेदान्ताभयदायकः ।
मनोमलमहाशुद्धः कमलाक्षमहाशयः ।
त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ ५॥

कलिदोषमहावह्निः साक्षाच्छिवविलोचनः ।
दिव्यचारित्र्यपूर्णश्च विवेकान्धजनाञ्जनः ।
त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ ६॥

राजराजशिरोरत्ननिघृष्टचरणोत्पलः ।
महामतिर्महाभागो भूगर्भव्योमपारगः ।
त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ ७॥

निर्विकल्पसमाधिस्थो विचारणविशारदः ।
चिन्मात्रदिव्यपूर्णाङ्गश्चरमोन्नतिदायकः ।

त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ ८॥

भारतोद्धारसन्त्यक्तसर्वसौख्यातिमानवः ।
धर्मग्लानिमहारात्रिप्रभातैकसुभावनः ।
त्वमेव हि महास्वामिन्विवेकानन्द ते नमः ॥ ९॥

सद्योजाताय ते स्वामिन् विश्वैककमलावले ।
नमस्तुभ्यं नमस्तुभ्यं विवेकानन्द ते नमः ॥ १०॥

महावीर्यधरो राजा भूपानां यमिनां तथा ।
पराक्रमप्रभावेण जितेन्द्रियो महाबलः ।
त्वमेव हि नमस्तुभ्यं विवेकानन्द ते नमः ॥ ११॥

मुनीनां योगिनां चैव पराक्रातमहद्यशः ।
शब्दे परे च निष्णातः पारमार्थिकदेशिकः ।
त्वत्तो न हि परः कोऽपि विवेकानन्द ते नमः ॥ १२॥

धर्मग्लान्याप्लुता भूमिः सगौरवकृता ह्रिया ।
त्वयैव रामकृष्णाब्जमधुपानधुरन्धरः ।
त्वत्तो न हि परः कोऽपि विवेकानन्द ते नमः ॥ १३॥

यतिसङ्घमहोद्यानसुखसञ्चारकारिणे ।
नरेन्द्रनाथदत्ताय विवेकानन्दस्वामिने ।
त्वत्तो न हि परः कोऽपि विवेकानन्द ते नमः ॥ १४॥

नमस्ते पूर्णप्रज्ञाय दिव्यत्यागमहात्मने ।
नरेन्द्रनाथदत्ताय विवेकानन्दस्वामिने ॥ १५॥

इति स्वामिगुणातीतानन्दविरचितं विवेकानन्दस्तोत्रम् ।

उद्बोधनपत्रिकातः विवेकानन्दशतवार्षिकीसङ्ख्यायाः सङ्गृहीतम् ।

Composed by Sw. Gunatitananda, who headed the San Francisco branch of Ramakrishna Math/Mission 1902-1915. He was one of the 16 direct disciples of Sri Ramakrishna. He built the first Hindu temple in North America.

Encoded and proofread by Sunder Hattangadi

*Swami Vivekananda Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*